श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ त्रिषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिषष्टितमः सर्गः ॥

## विश्वामित्रस्य महर्षिपदवीलाभः, मेनकया तस्य तपोभङ्गो ब्रह्मर्षिपदप्राप्तये तस्य घोरं तपश्च

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिम्।
अभ्यगच्छन् सुराः सर्वे तपः फलचिकीर्षवः॥ **1.63.1** ॥

अब्रवीत् सुमहातेजा ब्रह्मा सुरुचिरं वचः।
ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः॥ **1.63.2** ॥

तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात्।
विश्वामित्रो महातेजा भूयस्तेपे महत् तपः॥ **1.63.3** ॥

ततः कालेन महता मेनका परमाप्सराः।
पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे॥ **1.63.4** ॥

तां ददर्श महातेजा मेनकां कुशिकात्मजः।
रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा॥ **1.63.5** ॥

कन्दर्पदर्पवशगो मुनिस्तामिदमब्रवीत्।
अप्सरः स्वागतं तेऽस्तु वस चेह ममाश्रमे॥ **1.63.6** ॥

अनुगृह्णीष्व भद्रं ते मदनेन विमोहितम्।
इत्युक्ता सा वरारोहा तत्र वासमथाकरोत्॥ **1.63.7** ॥

तपसो हि महाविघ्नो विश्वामित्रमुपागमत्।
तस्यां वसन्त्यां वर्षाणि पञ्च पञ्च च राघव॥ **1.63.8** ॥

विश्वामित्राश्रमे सौम्ये सुखेन व्यतिचक्रमुः।
अथ काले गते तस्मिन् विश्वामित्रो महामुनिः॥ **1.63.9** ॥

सव्रीड इव संवृत्तश्चिन्ताशोकपरायणः।
बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन॥ **1.63.10** ॥

सर्वं सुराणां कर्मैतत् तपोऽपहरणं महत्।
अहोरात्रापदेशेन गताः संवत्सरा दश॥ **1.63.11** ॥

काममोहाभिभूतस्य विघ्नोऽयं प्रत्युपस्थितः।
स निःश्वसन् मुनिवरः पश्चात्तापेन दुःखितः॥ **1.63.12** ॥

भीतामप्सरसं दृष्ट्वा वेपन्तीं प्राञ्जलिं स्थिताम्।
मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः॥ **1.63.13** ॥

उत्तरं पर्वतं राम विश्वामित्रो जगाम ह।
स कृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः॥ **1.63.14** ॥

कौशिकीतीरमासाद्य तपस्तेपे दुरासदम्।
तस्य वर्षसहस्राणि घोरं तप उपासतः॥ **1.63.15** ॥

उत्तरे पर्वते राम देवतानामभूद् भयम्।
आमन्त्रयन् समागम्य सर्वे सर्षिगणाः सुराः॥ **1.63.16** ॥

महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः।
देवतानां वचः श्रुत्वा सर्वलोकपितामहः॥ **1.63.17** ॥

अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम्।
महर्षे स्वागतं वत्स तपसोग्रेण तोषितः॥ **1.63.18** ॥

महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक।
ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ॥ **1.63.19** ॥

प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम्।
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ॥ **1.63.20** ॥

यदि मे भगवन्नाह ततोऽहं विजितेन्द्रियः।
तमुवाच ततो ब्रह्मा न तावत् त्वं जितेन्द्रियः ॥ **1.63.21** ॥

यतस्व मुनिशार्दूल इत्युक्त्वा त्रिदिवं गतः।
विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः ॥ **1.63.22** ॥

ऊर्ध्वबाहुर्निरालम्बो वायुभक्षस्तपश्चरन्।
घर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ॥ **1.63.23** ॥

शिशिरे सलिलेशायी रात्र्यहानि तपोधनः।
एवं वर्षसहस्रं हि तपो घोरमुपागमत् ॥ **1.63.24** ॥

तस्मिन् सन्तप्यमाने तु विश्वामित्रे महामुनौ।
सन्तापः सुमहानासीत् सुराणां वासवस्य च ॥ **1.63.25** ॥

रम्भामप्सरसं शक्रः सर्वैः सह मरुद्गणैः।
उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ **1.63.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिषष्टितमः सर्गः ॥